## श्री गुरुचरणकमलेभ्यो नमः

## ग्रह कवच स्तोत्र

ॐ ह्रां ह्रीं सः मे शिरः पातु श्री सूर्य ग्रह पतिः |

ॐ घौं सौं औं मे मुखं पातु श्री चन्द्रो ग्रह राजकः ।

ॐ ह्रां ह्रीं ह्रां सः करो पातु ग्रह सेनापतिः कुजः ।

पायादंशं ॐ ह्रौं ह्रौं ह्रां सः पादौ ज्ञो नुपबालकः |

ॐ औं औं औं सः कटिं पातु पायादमरपूजितः ।

ॐ ह्रौं ह्रीं सः दैत्य पुज्यो हृदयं परिरक्षतु ।

ॐ शौं शौं सः पातु नाभिं मे ग्रह प्रेष्यः शनैश्चरः ।

ॐ छौं छां छौं सः कण्ठ देशं श्री राहुर्देवमर्दकः |

ॐ फौं फां फौं सः शिखी पातु सर्वांगमभितोऽवतु |

ग्रहाश्चैते भोग देहा नित्यास्तु स्फुटित ग्रहाः ।

एतदशांश सम्भूताः पान्तु नित्यं तु दुर्जनात् ।

अक्षयं कवचं पुण्यं सूर्यादि ग्रह दैवतम् ।

पठेद् वा पाठयेद् वापि धारयेद् यो जनः शुचिः ।

स सिद्धिं प्राप्नुया-दिष्टां दुर्लभां त्रिदशस्तुयाम् ।

तव स्नेह वशादुक्तं जगन्मंगल कारकम् ग्रह यन्त्रान्वितं कृत्वाभीष्टम-

क्षयमाप्नुयात् ।

**********